प्रश्नः 1. का नाम चित्तभूमिः संक्षेपेण निरूपयत ।

उत्तरम्—चित्तस्य भूमिः चित्तभूमिः । अर्थात्, चित्तस्य सहजप्रवृत्तिरेव चित्तभूमिः इति उच्यते । क्षिप्तं, मूढं, विक्षिप्तम् एकाग्रं निरुद्धमिति चित्तभूमयः ।

**(i) क्षिप्तचित्तभूमिः**—'क्षिप्तं' सदैव तेषु तेषु विषयेषु क्षिप्यमाणम् अत्यन्तमस्थिरम् । यथोक्तम्—"प्रख्यारूपं हि चित्तसत्त्वं रजसस्तमसोभ्यां संसृष्टमैश्वर्यविषयप्रियं भवति ।" एतादृक् चित्तं तु दैत्यानां दानवानां मदोद्भ्रान्त-विषयीजनानां वा भवति ।

**(ii) मूढचित्तभूमिः**—"मूढं तु तमः समुद्रेकान्निद्रावृत्तिमत् । मूढं तमसा निद्रादिविवृत्तिमत्।" यथोक्तम्—"तदेव तमसानुविद्धमधर्माज्ञानावैराग्यानैश्वर्योपगं भवति ।" अस्याम् दशायाम् विचारहीनता, किंकर्तव्यविमूढता चाञ्चल्यं च जायते । यथा—राक्षस—पिशाचादिकेषु चित्तेषु दरीदृश्यते ।

**(iii) विक्षिप्तचित्तभूमिः**—क्षिप्ताद् विशिष्टं (वि + क्षिप्त) विक्षिप्तम् । सत्त्वाधिक्येन समादधदपिचित्तं रजोमात्रयान्तरान्तरा विषयान्तरवृत्तिमद् । यथोक्तम्—"तदेव प्रक्षीणमोहावरणं सर्वतः प्रद्योतमानमनुविद्धं रजोमात्रया धर्मज्ञानवैराग्यैश्वर्योपगं भवति ।" ईदृशं चित्तं तु देवानां योगिनां वा भवति ।

**(iv) एकाग्रचित्तभूमिः**—यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति, क्षिणोति च क्लेशान्, कर्मबन्धनानि श्लथयति, निरोधमभिमुखं करोति, स सम्प्रज्ञातो योग इत्याख्यायते । यथोक्तम्—"तदेव रजोलेशमलपेतं स्वरूपप्रतिष्ठं सत्त्व-पुरुषान्यताख्यातिमात्रं धर्ममेधध्यानोपगं भवति ।" अन्यच्च—"शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः ।"

**(v) निरुद्धचित्तभूमिः**—सर्ववृत्तिनिरोधे त्वसंम्प्रज्ञातः समाधिः । स निर्बीजः समाधिः, न तत्र किञ्चित् सम्प्रज्ञायते इत्यसम्प्रज्ञातः ॥